दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णद्वादशी
ज्येष्ठ 29 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-230 | 1 | जून 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणा सुक्खूना 'नीति-आयोगस्य' शासकीय-परिषदः उपवेशने 'आरडीजी' इत्यनेन सह प्रदेशहितस्य विषयाः प्रखरतया उत्थापिताः

3 हिमाचलस्य 'सीबीएसई'-विद्यालयेभ्यः प्राप्ताः गणित-विषयस्य ३०८ नूतनाः शिक्षकाः, पञ्चसु दिनेषु दातव्यं भविष्यति कार्यग्रहणम्

5 कृषिमन्त्रिणः घोषणा: बिहारराज्ये उर्वरकस्य नास्ति कापि न्यूनता; अवैधविक्रेतृणां खले कंठापातः

## ओमान्-देशस्य टैंकर-आक्रमणस्य विषये भारतेन प्रबलं विरोधं प्रकटितम्; एम्. टी. जलवीर-नौकायाः सर्वे कर्मचारिणः सुरक्षिताः इति सूचनास्ति



**हिमसंस्कृतवार्ता।** ओमान्-देशस्य तटे एकस्याः नौकायाः उपरि सद्यः एव कृताक्रमणम् भारतेन निन्दितं यस्मिन् त्रयः भारतीय नागरिकाः मृताः। नवदिल्ल्याम् अन्तर्मन्त्रिमण्डलीय-वार्ताहर-सम्मेलनम् अभिसंबोधयन्, विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत्, सर्वकारेण अमरीकादेशस्य चार्ज-डी-अफेयर्स इत्येतान् आहूय प्रबलं विरोधं प्रकटितम् अस्ति इति। सः अस्मिन् प्रदेशे नौकायानस्य उपरि निरन्तरं आक्रमणानि अतीव चिन्तास्पदं वर्णितानि तथा च शान्तिं स्थिरतां च पुनः स्थापयितुं संवादस्य कूटनीतेः च आह्वानम् अपि अकरोत्। गल्फ-क्षेत्रस्य अपरसचिवः असीम् आर्. महाजनः अवदत् यत्, सर्वकारः पश्चिम एशिया-क्षेत्रस्य स्थितिं निकटतया निरीक्षमाणः अस्ति, भारतीयाभियानेन च अहोरात्रम् सहायता सेवाः अपि आरब्धवन्तः। सः अवदत् यत् अस्मिन् मासे अष्टदिनाङ्के ओमान-देशस्य समीपे लक्षिताः एम. टी. मारिवेक्स-नौकायाः सर्वे चतुर्विंशतिः भारतीयाः कर्मचारिणः सुरक्षिततया रक्षिताः सन्ति, ते शीघ्रमेव स्वदेशं प्रत्यागमिष्यन्ति इत्यपेक्षा अस्ति। पत्तन-नौवहन-जलमार्ग-मन्त्रालयस्य अपरसचिवः मुकेश मङ्गलः अवदत् यत् मृतानां नाविकानां परिवारान् सीमेन्-वेल्फेयर्-फण्ड्-सोसाईटी इत्यस्य माध्यमेन प्रत्येकस्मै दशलक्षरूप्यकाणां अनुग्रहराशिः प्रदीयते। सः अग्रे सूचितवान् यत् गतदिने ओमान-देशस्य शिनास-पत्तनस्य समीपे समुद्रीय-सुरक्षा-घटनायां संलग्नाः गिनी-बिसाऊ इत्यस्य ध्वजेन युक्तः एम्. टी. जलवीर इत्यस्मिन् स्थिताः सर्वेपि विंशतिः भारतीय कर्मचारिणः सुरक्षिताः सन्ति, निर्वासनप्रयासाः च प्रचलन्ति। अत्रान्तरे, देशे उर्वरकस्य, इन्धनस्य च आपूर्तिः स्थिरा अस्ति इति प्रशासनेन आश्वासितम्। उर्वरकविभागस्य अपरसचिवा अपर्णा एस्. शर्मा इत्येषा अवोचत् यत् पर्याप्तानि भण्डाराणि उपलभ्यन्ते, अनेकदेशैः आयातः च सुनिश्चितः अस्ति। पेट्रोलियम-प्राकृतिकेन्धन-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अकथयत् यत् आन्तरिक-शोधनागाराणि उच्चक्षमतया कार्यं कुर्वन्ति। अशोधिततैलस्य, पेट्रोल् इत्यस्य, डीज़ल् इत्यस्य, एल्. पी. जी. इत्यस्य, प्राकृतिकेन्धन इत्यस्य च आपूर्तिः अप्रभाविता अस्ति इति सा अवोचत्।

### राजस्थाने जैसलमेर-जनपदे रामगढ़े विंशतिः किलोवाट्-क्षमतायुक्तस्य एफएम प्रेषकस्य आभासीय उद्घाटनम्

सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः गतदिने राजस्थाने जैसलमेर-जनपदे रामगढ़े विंशतिः किलोवाट्-क्षमतायुक्तस्य एफएम प्रेषकस्य आभासीय उद्घाटनं अकरोत्। जयपुरस्थे आकाशवाणी परिसरे समायोजिते एकस्मिन् कार्यक्रमे उद्घाटनकार्यमिदं सम्पन्नम्। अनेन सह राज्ये एफएम प्रेषकाणां संख्या विवर्ध्य ऊनचत्वारिंशत् जाता। नूतनः प्रेषकः सीमावर्ति क्षेत्रेषु अशीतिः किलोमीटर-परिमिते क्षेत्र रेडियो प्रसारणस्य आवरणं प्रदास्यति। एतेन जनाः विविधाः सूचनाः, शैक्षिक सामग्र्यः प्राप्तुं शक्नुवन्ति। सभां सम्बोधयन् श्रीवैष्णवः अवदत् यत् देशस्य सीमाक्षेत्रेषु कश्मीरतः कच्छपर्यन्तम्, आकाशवाणी - दूरदर्शनयोः प्रसारण-सेवायाः विशिष्टाः लाभाः प्राप्तस्यन्ते ।

### गृहिण्यः स्व-कुटुम्बानां भविष्य-चरित्रनिर्माणे च महत्वपूर्णां भूमिकां निर्वहन्ति-सर्वोच्च न्यायालयः

गृहकार्यस्य अधिक-मान्यतां प्रदातुं सम्प्रवर्तित एकस्मिन् ऐतिहासिके निर्णये भारतीय सर्वोच्च न्यायालयेन गतदिने निर्णयः स्वीकृतः यत् गृहिण्यः स्व-कुटुम्बानां भविष्य-चरित्रनिर्माणे च महत्वपूर्णां भूमिकां निर्वहन्ति। अतः ताः राष्ट्रनिर्मात्रि इत्यनेन सम्मानेन सम्मानिताः। न्यायालयेन प्रतिपादितं यत् गृहव्यवस्थापनं कुर्वत्यः महिलाः केवलं गृहिण्यः इति न कथनीयाः, यतोहि शब्दोऽयं समाजे तासां योगदानं न्यूनं करोति।

### प्रशासनेन एथेनॉल मिश्रित पेट्रोल-उत्पाद शुल्कं अपसारितम्

प्रशासनेन एथेनॉल मिश्रित पेट्रोल-उत्पाद शुल्कं अपसारितम्। वित्तमन्त्रालयेन एकया अधिसूचनया प्रकाशितं यत् द्वविंशति-तः त्रिंशत् प्रतिशतन्मितम् एथेनॉल मिश्रित पेट्रोल-उत्पादं केन्द्रीय उत्पाद शुल्क श्रेण्यात् पूर्णतया विमुक्तम्। मन्त्रालयेन उक्तं यत् अस्य शैथिल्यस्य उद्देश्यं भारतीय एथेनॉल मिश्रण कार्यक्रमं सुदृढ़ीकरणमस्ति।

### नीति आयोगस्य सभायां, प्रधानमन्त्रिणा नरेन्द्रमोदिना विकसितभारतस्य कृते कौशलस्य, वृत्त्यावसरस्य च महत्त्वं प्रतिपादितम्




**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् साम्प्रतं विश्वं अनिश्चिततायाः, अस्थिरतायाश्च काले अनुभवति। परं भारतदेशः आत्मविश्वासेन दृढ़संकल्पेन च अग्रेसरति। नवदिल्ल्यां राष्ट्रपति भवने नीति-आयोगस्य दशम-शासक परिषदः अध्यक्षतां कुर्वन् सः अकथयत् यत् यथा-यथा भारतं विकसितभारतस्य लक्ष्यस्य समीपं गच्छति तथा तथा केन्द्र-राज्य-सर्वकारयोः उत्तरदायित्वं वर्धयन्ति । तेन भणितं यत् राज्येषु पारस्परिक सहयोगः, संवादः, विचाराणम् आदान-प्रदानं आवश्यकं भवेत्। विषयेऽस्मिन् नीत्यायोगः महत्वपूर्णां भूमिकां निर्वाहयति। नीति-आयोगस्य सहयोगेन सर्वेषां राज्याणां केन्द्र शासित प्रदेशानां च मध्ये विचार-विनिमयः सम्यक् भवेत् विकसित भारतस्य लक्ष्यम्प्रति बलमपि वर्धिष्यति । सभायामस्यां देशे कौशलविकासस्य संवर्धनं, वृत्यवसराणि अपि वर्धिष्यन्ति। वर्षस्य अस्य विषयो विद्यते - सप्त चत्वारिंशदुत्तर-द्वि-सहस्रतम् वर्षपर्यन्तं विकसित भारताय समावेशी मानवविकासः।

## सुभाषितम्

**बुद्धिः प्रभावः तेजश्च,**
**सत्वमुत्थानमेव च।**
**व्यवसायश्च यस्यास्ति,**
**तस्य वृत्तिभयं कुतः।।**

अर्थात्- जो व्यक्ति बुद्धिमान, प्रभावशाली, तेजस्वी, अपनी उन्नति के लिए सदैव उत्सुक व प्रयत्नशील हो तथा कोई व्यवसाय भी करता हो, तो उसे अपना जीवनयापन न हो पाने का भय कैसे हो सकता है?




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

### भारतेन माल्दीवस्-देशं प्रति खसरा-रोगस्य सूच्यौषधीनां, चिकित्सासहाय्यं प्रेषितम्

हिमसंस्कृतवार्ता। भारतेन, प्रतिरक्षण-व्याप्तिं सुदृढं कर्तुं, सार्वजनिक स्वास्थ्यस्य रक्षणार्थं च प्रयत्नान् समर्थयितुं माल्दीवस्-देशं प्रति विंशति सहस्रं यावत् खसरा सुच्यौषधीनां, प्रायः त्रिणि-टन्-चिकित्सा-सामग्रीं च प्रेषितम्। विदेशमन्त्रालयः अवदत् यत् एतत् सहयोगं द्वीपराष्ट्रे वर्धमानानां खसरा-प्रकरणानां निवारणे साहाय्यं करिष्यति तथा च माल्दीवस्-सर्वकारस्य प्रतिक्रिया उपायान् सुदृढं करिष्यति इति। तस्य 'नेबहुड़ फ़र्स्ट', विजन-महासागर इत्येतयोः अन्तर्गतं, भारतं माल्दीवस्-देशेन सह संयुक्तप्राथमिकतासु निकटतया कार्यं कर्तुं प्रतिबद्धम् अस्ति।

# मुख्यमन्त्रिणा सुक्खूना 'नीति-आयोगस्य' शासकीय-परिषदः उपवेशने 'आरडीजी' इत्यनेन सह प्रदेशहितस्य विषयाः प्रखरतया उत्थापिताः




**शासकीय-परिषद् उपवेशने हिमाचलस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू**

**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना वीरवासरे नवदेहल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायाम् आयोजिते नीति-आयोगस्य एकादशमे (११ वें) शासकीय-परिषदः उपवेशने भागः गृहीतः। अस्य उपवेशनस्य मुख्यविषयः 'विकसितभारतार्थं समावेशी-मानव-विकासः' (विकसित भारत के लिए समावेशी मानव विकास) आसीत्। उपवेशने समग्र-देशे समावेशी-विकासं सुनिश्चितं विधातुं तथा विकसित-भारतस्य दृष्टिकोणं दृढ-परिणामेषु परिवर्तयितुं कार्यनीतीनाम् उपरि विस्तरेण चर्चा संजाता। अस्मिन् अवसरे मुख्यमन्त्रिणा हिमाचलप्रदेशस्य सम्मुखं विद्यमानान् वित्तीय-आवशङ्कानानान् प्रखरतया उत्थापयता प्रधानमन्त्रिणं प्रति राज्यस्य कृते एकां उच्चस्तरीय-समितिं निर्मातुं प्रार्थना कृता, या समितिः राजस्वहानि-अनुदानस्य (RDG) समाप्तिं, प्राकृतिक-आपद्भिः सञ्जातां हानिं, जलविद्युत-परियोजनासु मुक्त-विद्युतः भागे न्यूनतां तथा 'जीएसटी' (GST) व्यवस्थायाः उत्पन्नां राजस्व-हानिम् आकलितुं शक्नुयात्। मुख्यमन्त्रिणा प्रतिपादितं यत् देशस्य प्रगतौ हिमाचलप्रदेशः महत्त्वपूर्णं योगदानं ददाति, परन्तु उक्त-परिस्थितीनां कारणात् राज्यं आर्थिक-कठिनतानां सम्मुखीकरणं कुरुते। तेन उच्चस्तरीय-समित्याः प्रतिवेदनस्य (Report) आधारेण केन्द्रसर्वकारं प्रति राज्यस्य न्यायोचितं भागं प्रदातुं अनुरोधः कृतः। तेन उक्तं यत् राजस्वहानि-अनुदानस्य समाप्त्या प्रदेशस्य अर्थव्यवस्था भृशं प्रभाविता अभवत्। राज्ये प्रदत्ता २५,००० कोटि-रूप्यकाणां राशिः अस्याः हान्याः पूर्तये पर्याप्ता नास्ति। तेन विकास-गतिविधीनां सुचारुरूपेण सञ्चालनाय एषा राशिः वर्धयितुं ५०,०००कोटि-रूप्यकाणि कर्तुं याचना कृता।मुख्यमन्त्रिणा प्रोक्तं यत् हिमाचलप्रदेशः देशस्य 'ग्रीन फ्रण्टियर' (हरित-सीमान्तः) वर्तते, विकसित-भारतस्य लक्ष्यं वास्तवविकरूपं प्रदातुं केन्द्रसर्वकारेण राज्यस्य विशिष्टासु आवश्यकतासु ध्यानं दातव्यम्। तेन विज्ञापितं यत् 'भारतीय वन प्रबंधन संस्थानम्' इत्यस्य एकस्य अध्ययनस्यानुसारं हिमाचलप्रदेशः देशाय प्रतिवर्षं प्रायः ९०,००० कोटि-रूप्यकाणां मूल्ययुक्ताः पारिस्थितिकीय-सेवाः (Ecological services) प्रददाति, परन्तु अस्य अनुरूपं राज्यस्य कृते कापि पर्याप्ता आर्थिकी प्रतिपूर्तिः न प्राप्यते। तेन कथितं यत् हिमाचलप्रदेशे प्रायः १३,००० मेगावाट् विद्युत-उत्पादनं सति अपि राज्यस्य कृते मुक्त-विद्युतः उचितः भागः न मिलति। एतदतिरिच्य 'भाखड़ा ब्यास प्रबंधन बोर्ड' (BBMB) इत्यस्मात् राज्यस्य कृते प्रायः ७,००० कोटि-रूप्यकाणां अवशिष्टा (बकाया) राशिः अपि न प्राप्ता। तेन उक्तं यत् प्राकृतिक-आपदानां सर्वाधिकं प्रभावं सोढ्वपि प्रदेशः केन्द्रेण घोषितायाः १,५०० कोटि-रूप्यकाणां विशिष्ट-सहायता-राशेः कृते अधुनापि प्रतीक्षां करोति। तेन विज्ञापितं यत् वर्तमान-'जीएसटी'-व्यवस्थायाः कारणात् गतेषु अष्टसु वर्षेषु राज्येन प्रायः २५,००० कोटि-रूप्यकाणां राजस्व-हानिः सोढा। मुख्यमन्त्रिणा मानव-विकास-सूचकाङ्केषु प्रदेशस्य उपलब्धीनाम् उल्लेखं कुर्वता कथितं यत् हिमाचलप्रदेशः वर्षे २०२५ मध्ये पूर्ण-साक्षरः घोषितः अभवत् तथा वर्षे २०२६ मध्ये विद्यालय-शिक्षा-प्रदर्शन-ग्रेडिंग-सूचकाङ्के राज्ये षष्ठं (६ वां) स्थानं प्राप्तवान्। वर्षे २०२२ मध्ये यदा तस्य सर्वकारेण कार्यभारः गृहीतः, तदा राज्यं अस्मिन् सूचकाङ्के २१ तमे स्थाने आसीत्। उच्चशिक्षायां प्रदेशस्य सकल-नामाङ्कन-अनुपातः (Gross Enrollment Ratio) ४३ प्रतिशतं वर्तते, यत् राष्ट्रिय-औसतात् २८.४ प्रतिशतम् अधिकम् अस्ति। तेन राष्ट्रिय-परिवार-स्वास्थ्य-सर्वेक्षणे (NFHS) अपि राज्यस्य उत्कृष्ट-प्रदर्शनस्य उल्लेखः विहितः।


मुख्यमन्त्री सुक्खुः अवदत् यत् सौर-ऊर्जा, हरित-हाइड्रोजन, पम्प-स्टोरेज तथा बैटरी-स्टोरेज सदृशीनां प्रवृत्तीनां माध्यमेन हिमाचलप्रदेशः हरित-ऊर्जा-क्षेत्रे देशस्य अग्रणी-राज्यं भवितुं दिशि अग्रे सरति। तेन 'चन्द्रभागा-रावी-ब्यास-लिङ्क-परियोजनायाः' कार्यान्वयन-काले राज्यस्य हितानां रक्षां सुनिश्चितं कर्तुम् अनुरोधः अपि कृतः। तेन 'मुख्यमंत्री अपना परिवार सुखी परिवार' योजनायाः उल्लेखं कुर्वता कथितं यत् अस्याः योजनायाः उद्देश्यं राज्यस्य प्रायः १.५ लक्षं निर्धन-परिवाराणां पहिचानं कृत्वा तान् आत्मनिर्भरं विधातुं वर्तते। मुख्यमन्त्रिणा पर्यटनस्य प्रोत्साहनाय श्रेष्ठ-वायु-सम्पर्कस्य (हवाई संपर्क) आवश्यकतायाम् बलं ददता 'गग्गल-विमानपतनस्य' (गग्गल एयरपोर्ट) विस्तारस्य विकासस्य च विषयः उत्थापितः, येन हिमाचलप्रदेशः 'वन स्टेट, वन इंटरनेशनल डेस्टिनेशन' (एकः राज्यः, एकं अन्तर्राष्ट्रियं गन्तव्यम्) रूपेण विकसितः कर्तुं शक्येत। तेन बालानां पोषण-कार्यक्रमाणां प्रभावी-कार्यान्वयनार्थं स्वास्थ्य-महिला-बालविकास-शिक्षा-विभागानां मध्ये श्रेष्ठ-समन्वयनस्य आवश्यकतायाम् बलं दत्तम्। अनेन सहैव आशा-अङ्गनबाडी-कार्यकर्त्रीणां मध्ये 'डेटा'-साझाकरणं (Data sharing) महत्त्वपूर्णं प्रतिपादयता कृत्रिम-बुद्धिमत्ता (AI) आधारिता, सूचना-प्रौद्योगिकी-समर्थिता तथा साक्ष्य-आधारिता निरीक्षण-प्रणाली (Monitoring system) विकसितुं आवश्यकता प्रकटिता। मुख्यमन्त्रिणा राज्यसर्वकारेण नशा-विरुद्धं सञ्चालितस्य व्यापक-अभियानस्य अपि सूचना प्रत्ता। तेन गुप्तचर-तन्त्रस्य (इंटेलिजेंस) सुदृढीकरणाय विविधानां संस्थानां मध्ये श्रेष्ठ-समन्वयनार्थं केन्द्रसर्वकारात सहयोगः याचितः। उपवेशने विविधानां राज्यानां मुख्यमन्त्रिणः, उप-राज्यपालाः, केन्द्रीय-मन्त्रिणः, विशिष्ट-आमन्त्रित-सदस्याः, नीति-आयोगस्य उपाध्यक्षाः, सदस्याः, मुख्य-कार्यकारी-अधिकारिणः (CEO) तथा हिमाचलप्रदेशस्य मुख्यसचिवः के.के. पन्तः अपि उपस्थिताः आसन्।

# 'सीबीएसई- उपसंवर्गशिक्षककल्याणसंघः' इत्यस्य प्रदेशाध्यक्षः अभवत् खजानसिंहः

हिमसंस्कृतवार्ताः - शिमला।हिमाचलप्रदेशे 'सीबीएसई-उपसंवर्गशिक्षककल्याणसंघस्य (हिमाचल प्रदेश सीबीएसई सब-काडर शिक्षक कल्याण संघ) सङ्घटनं जातमस्ति। अस्मिन् सङ्घटने प्रदेशाध्यक्षत्वेन खजानसिंहः निर्वाचितः। वीरवासरे सम्पन्नायाम् एकस्याम् ऑनलाइन-कोर-ग्रुप-सभायाम् एषा नियुक्तिः विहिता। उपवेशने प्रदेशस्य विविधेभ्यः जनपदेभ्यः सदस्याः भागं गृहीतवन्तः। राज्य-कर्मचारी-महासङ्घस्य प्रदेशाध्यक्षः नरेशठाकुरः उपवेशने उपस्थितः आसीत्। हिमाचल प्रदेश कला अध्यापक सङ्घस्य महासचिवः विजयहीरः अपि विशेषरूपेण उपस्थितः आसीत्। खजानसिंहस्य चयने सदस्याः तस्मै शुभाशयाः प्रत्तवन्तः। सदस्यैः सङ्घटनाय नवीना दिशा प्राप्स्यते इति आशा प्रकटीकृता। नवनिर्वाचितेन प्रदेशाध्यक्षेण खजानसिंहेन उक्तं यत् संघस्य मुख्योद्देश्यं 'सीबीएसई' - उपसंवर्गशिक्षकाणां हितानां रक्षा अस्ति। तेन एतदपि कथितं यत् सङ्घटनं तेषाम् न्यायोचितान् अधिकारान् प्रदापयिष्यति। तेन शिक्षकाणां स्वरं सुदृढतया उत्थापयितुं सङ्कल्पः गृहीतः।उपवेशने 'सीबीएसई' सब-काडर शिक्षकाणां प्रतिनियुक्ति-विषये विस्तरेण विचार-विमर्शः सञ्जात। सेवासम्बद्धिनां लम्बितानां प्रकरणानां अन्यासां अभ्यर्थना-विषयेषु अपि चर्चा विहिता। सदस्यैः निर्णयः स्वीकृतः यत् शिक्षकाणां समस्याः अभ्यर्थनाश्च सर्वकारस्य सम्मुखम् उपस्थापयिष्यन्ते। शिक्षा-विभागस्य समक्षम् अपि एते मुदाः प्रभावशालिरूपेण स्थापयिष्यन्ते, यस्य उद्देश्यं तेषां समयबद्ध-समाधानं निश्चितं विधातुं वर्तते। उपवेशने सङ्घटनस्य विस्तारस्य रूपरेखा-विषये अपि विमर्शः अभवत्। सदस्यता-अभियानाय गतिं प्रदातुं महत्त्वपूर्णाः निर्णयाः स्वीकृताः। अग्रिम-गतिविधीनां योजनायाः उपरि अपि सम्मन्त्रणम् अभवत्। सर्वैः सदस्यैः एकत्रीयभूय शिक्षकाणां हिते कार्यं कर्तुं सङ्कल्पः विहितः। ते सङ्घटनं प्रति अत्यधिकं सशक्तं विधातुं प्रतिबद्धतामपि पुनरुक्तवन्तः।



# हिमाचलस्य 'सीबीएसई'-विद्यालयेभ्यः प्राप्ताः गणित-विषयस्य ३०८ नूतनाः शिक्षकाः, पञ्चसु दिनेषु दातव्यं भविष्यति कार्यग्रहणम्




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य सर्वकारीय-विद्यालयेषु केन्द्रीय-माध्यमिक-शिक्षा-मण्डल-आधारित-शिक्षाव्यवस्थायाः सुदृढीकरणाय शिक्षा-विभागेण गणित-विषयस्य ३०८ शिक्षकाणां नियुक्त्याः आदेशाः निर्गताः। राज्य-चयन-आयोगस्य संस्तुतेः प्रदेशसर्वकारस्य च अनुमतेः पश्चात् चयनिताः अभ्यर्थिनः 'सीबीएसई'-मण्डलेन सम्बद्धेषु अथवा सम्बद्धतायै अधिसूचितेषु राजकीय-वरिष्ठ-माध्यमिक-विद्यालयेषु नियुक्ताः सन्ति। शिक्षा-निदेशालयेन प्रसारित-कार्यालय-आदेशानुसारम् एतेषां शिक्षकाणां नियुक्तिः 'स्कीम फॉर सीबीएसई अफिलिएटेड स्कूल्स ऑफ एक्सीलेंस इन हिमाचल प्रदेश' इत्यस्याः अन्तर्गतं विरचितायाः विशिष्ट-उपयोजनायाः अन्वेषणे कृता अस्ति। एताः नियुक्तयः पूर्णतः अस्थायी-आधारेण पञ्चवर्षाणाम् अवधये भविष्यन्ति

## चयनिताः शिक्षकाः प्राप्स्यन्ति

### प्रतिमासं ३० सहस्र रूप्यकाणां मानदेयम्

चयनितेभ्यः शिक्षकेभ्यः प्रतिमासं ३० सहस्र (३०,०००) रूप्यकाणां मानदेयं प्रदास्यते, यत् शैक्षणिक-सत्रस्य १० मासेभ्यः देयं भविष्यति। एतेषां शिक्षकाणां नियुक्तिः कस्यापि स्वीकृत-नियमित-पदस्य विरुद्धं न विहिता। अतः ते सर्वकारीय-कर्मचारिणः न अनुमन्यन्ते, न च तेभ्यः नियमित-कर्मचारिभ्यः प्राप्यमाणाः सेवा-लाभाः, वेतनमानं, पेन्शन् अथवा अन्याः सुविधाः प्रदास्यन्ते। तेषां सेवाः केवलं सम्बद्ध-उपयोजनायाः अनुबन्धस्य (कांट्रैक्ट) च नियमानाम् अनुसारेण एव सञ्चालिताः भविष्यन्ति। शिक्षा-निदेशालयेन चयनिताः अभ्यर्थिनः आदेश-निर्गमनात् पञ्च-कार्यदिवसानाम् अभ्यन्तरे सम्बद्ध-विद्यालये कार्यभार-ग्रहणायादिष्टाः। निर्धारितावधौ कार्यग्रहणं न करणे सति नियुक्तिः निरस्ता (रद्द) भविष्यति। कार्यग्रहण-काले अभ्यर्थिभिः चिकित्सकीय-योग्यता-प्रमाणपत्रं (मेडिकल फिटनेस), स्व-घोषणापत्रं तथा निर्धारित-प्रारूपे अनुबन्ध-पत्रं बन्ध-पत्रं (बॉन्ड) च प्रदातव्यं भविष्यति। निदेशालयेन विद्यालय-प्रधानाचार्याः चयनितानाम् अभ्यर्थीनां मूल-प्रमाणपत्राणां अभिलेखानां च पुनः सत्यापनं कर्तुम् आदिष्टाः। कस्यापि प्रकारकस्य त्रुटौ, तथ्य-गोपने अथवा असत्य-सूचनायां प्राप्तायां सत्यां नियुक्तिः निरस्तीकर्तुं शक्यते तथा विधिकार्यविधिः अपि अमले आनेष्यते।

## बालवाटिकातः द्वादश-कक्षा-पर्यन्तं पाठयिष्यन्ति गणितम्, कस्मिन्नपि विद्यालये विधातुं शक्यते नियुक्तिः

नियुक्ताः शिक्षकाः केवलं वरिष्ठ-कक्षा-पर्यन्तमेव सीमिताः न स्थास्यन्ति। तेभ्यः बालवाटिका-१ तः आरभ्य द्वादश-कक्षा-पर्यन्तं छात्राणां गणितीय-अवबोधस्य आधारभूत-अवधारणानां च सुदृढीकरणस्य उत्तरदायित्वं समर्पितम्। आवश्यकतायां सत्याम् अतिरिक्ताः निदानात्मिकाः (रिमेडियल) कक्षाः अपि ग्रहीतव्याः भविष्यन्ति, येन छात्राणां गणित-दक्षतायां परिष्कारः भवेत्। शिक्षा-विभागेण नियुक्ताः शिक्षकाः राज्यस्य कस्मिन्नपि सर्वकारीय-विद्यालये नियोक्तुं अथवा प्रतिनियुक्त्या (डेप्युटेशन) प्रेषयितुम् अधिकारः सुरक्षितः स्थापितः। आवश्यकतानुसारं ते 'क्लस्टर'-अन्तर्गत-अन्य-विद्यालयेषु, प्राथमिक-विद्यालयेषु अथवा समीपस्थेषु सर्वकारीय-विद्यालयेष्वपि अल्पकालावधये प्रेषयितुं शक्यन्ते। एतदतिरिच्य ते रिक्तेषु पदेषु अथवा अवकाशे गतानां शिक्षकाणां स्थाने वैकल्पिक-शिक्षकरूपेण (सब्स्टीट्यूट टीचर) अपि कार्यं विधास्यन्ति।

### १० आकस्मिक-अवकाशाः मातृत्व-अवकाशश्च

योजनान्तर्गतं शिक्षकेभ्यः वर्षे १० आकस्मिक-अवकाशाः (कैजुअल लीव) तथा मातृत्व-लाभ-अधिनियम-१९६१ अनुसारेण मातृत्व-अवकाशः प्राप्स्यते। यद्यपि 'सीसीएस'-नियमाः, अवकाश-नियमाः, पेन्शन-नियमाः अन्ये सर्वकारीय-सेवा-नियमाश्च एतेषु प्रवृत्ताः न भविष्यन्ति। योजनायाः अन्तर्गतं विहितः सेवाकालः भविष्ये कस्यापि सेवा-लाभस्य ज्येष्ठतायाः (वरिष्ठता) कृते अपि मान्यो न भविष्यति। योजनान्तर्गतं कार्यरताः शिक्षकाः भविष्ये नियमित-नियुक्तेः अथवा नियमितीकरणस्य (रेगुलराइजेशन) कञ्चन अधिकारं न प्राप्स्यन्ति। यदि भविष्ये सर्वकारः नियमित-पदेषु नियुक्तिं करोति, तर्हि एतेष्वपि शिक्षकेषु अन्य-अभ्यर्थिनः इव चयनप्रक्रियायां भागः ग्रहीतव्यः भविष्यति तथा निर्धारिता परीक्षा चयनप्रक्रिया वा उत्तीर्णा करणीया भविष्यति। शिक्षकाः 'हिमकेयर' 'आयुष्मान भारत' सदृशानां स्वास्थ्य-योजनानां लाभं प्राप्स्यन्ति। तथापि सर्वकारीय-कर्मचारिणः इव चिकित्सकीय-प्रतिपूर्तेः (मेडिकल रीइंबर्समेंट) सुविधा उपलब्धा न भविष्यति।




# अधुना ग्रामे-ग्रामे प्राप्स्यते ऋतोः समीचीनं ज्ञानम्, ३७५८ पञ्चायतेषु स्थापयिष्यन्ते स्वचालित-ऋतु-केन्द्राणि

**हिमसंस्कृतवार्ताः -शिमला।** हिमाचलप्रदेशे ऋतोः (मौसम) समीचीनं ज्ञानम् अधुना ग्राम-स्तरे एव उपलब्धं भविष्यति। केन्द्रसर्वकारस्य महत्त्वाकाङ्क्षिण्याः 'वेदर इन्फॉर्मेशन एंड नेटवर्क डाटा सिस्टम' इत्यस्याः योजनायाः अन्तर्गतं प्रदेशस्य सर्वेषु ३७५८ ग्रामपञ्चायतेषु स्वचालित-ऋतु-केन्द्राणि ('ऑटोमेटिक वेदर स्टेशन') स्थापयिष्यन्ते। प्रायः द्विसप्तति-कोटि (७२ करोड़) रूप्यकाणां व्यय-युक्ता एषा योजना कृषकाणाम्, उद्यानपालकानां (बागवानों) तथा विद्यालयीयच्छात्राणां कृते अतीव लाभप्रदा सिद्धा भविष्यति। अस्याः योजनायाः अन्तर्गतं पञ्चायतेषु सम्बद्धेषु सर्वकारीय-विद्यालयेषु आधुनिकानां ऋतु-केन्द्राणां स्थापना विधास्यते, याः स्थानीय-स्तरे ऋतोः प्रत्येकं गतिविधिं पर्यवलोचयिष्यन्ति। एतेभ्यः केन्द्रेभ्यः तापमानस्य, वृष्टेः, वायोः गतेः, करकावृष्टेः (ओलावृष्टि) तथा अन्यासाम् ऋतु-सम्बद्धिनीनां सूचनानां सटीकं विवरणं प्राप्तं भविष्यति। अनेन कृषकाः उद्यानपालकाश्च समयेन ऋतोः परिवर्तनं ज्ञातुं शक्ष्यन्ति तथा ते स्व-शस्यानां (फसलों) फलोद्यानानां च हानि-निवारणाय श्रेष्ठान् निर्णयान् ग्रहीतुं प्रभविष्यन्ति। प्रदेशे एतेषां केन्द्राणां स्थापनाय गुजरात-कानपुर-क्षेत्रयोः विविधाभ्यां कम्पनीभ्यां निविदाः (टेंडर) आबंटिताः सन्ति। कार्यस्य समाप्त्यनन्तरमेव कम्पनीभ्यः केन्द्रसर्वकारस्य पक्षतः धन-भुक्तिः विधास्यते। अधुना यावत् ऋतु-सम्बद्धं विस्तृतं ज्ञानं मुख्यरूपेण खण्ड (ब्लॉक)-तहसील-स्तरं यावत् एव सीमितम् आसीत्, परन्तु अस्याः नूतन-व्यवस्थायाः प्रवृत्तौ सत्यां प्रत्येकस्य पञ्चायतस्य स्वकीयः ऋतु-अभिलेखः (वेदर रिकॉर्ड) उपलब्धो भविष्यति। अनेन ऋतु-पूर्वानुमानं अत्यधिकं समीचीनं स्थानीय-परिस्थितीनां अनुकूलं च भवितुं शक्ष्यति। अस्याः योजनायाः एकः प्रमुखः पक्षः एषोऽपि वर्तते यत् एतानि ऋतु-केन्द्राणि विद्यालय-परिसरेषु स्थापयिष्यन्ते। अनेन छात्रेभ्यः ऋतुविज्ञान-पर्यावरण-सम्बद्धं व्यावहारिकं ज्ञानं प्राप्स्यते तथा ते आधुनिक-तन्त्रज्ञानेन (टेक्नोलॉजी) अपि परिचिताः भवितुं शक्ष्यन्ति। एतानि स्वचालित-ऋतु-केन्द्राणि प्रदेशस्य सर्वेषु पञ्चायतेषु मार्च-मासं यावत् स्थापनीयानि भविष्यन्ति।

## कृषकेभ्यः उद्यानपालेभ्यश्च वरदान-रूपिणी भविष्यति एषा योजना

विशेषज्ञानां मतं वर्तते यत् जलवायु-परिवर्तनस्य (Climate change) वर्धमान-प्रभावाणां मध्ये एषा योजना हिमाचलस्य कृषकाणां उद्यानपालकानां च कृते कस्मिश्चित् वरदानात् न्यूना न भविष्यति। स्थानीय-स्तरे उपलब्धं सटीकं ऋतु-ज्ञानं कृषिं उद्यानपालनं च अत्यधिकं सुरक्षितं, वैज्ञानिकं, लाभप्रदं च विधातुं प्रमुखां भूमिकां निर्वहेत्।

प्रदेशस्य सर्वेषु पञ्चायतेषु 'ऑटोमेटिक वेदर स्टेशन' स्थापयिष्यन्ते। राज्यस्य उद्यानपालकैः कृषकैः सहैव विद्यालयानां छात्रैः अपि अस्य लाभः प्राप्स्यते तथा च ऋतोः सम्बन्धिनी सटीकी सूचना जनेभ्यः उपलब्धा भविष्यति।

**– सी पाल रासु, प्रदेश-सचिवः, कृषि-एवं-वानिकी-विभागः।**

# मण्डी-नगरस्य पञ्चशतवर्षाणां (५००) इतिहासस्य प्रलेखने विदुषां भूमिका महती- आचार्यः ललितकुमार अवस्थी



**हिमसंस्कृतवार्ताः-** सरदार-पटेल-विश्वविद्यालयस्य मंडी इत्यस्य इतिहास- विभागेन पञ्चशतवर्षाणां (५००) ऐतिहासिकी यात्रा" इति विषये शोधगोष्ठ्याः आयोजनं कृतम्।सरदारपटेल विश्वविद्यालयः मण्डी इत्यस्य इतिहासविभागेन "मण्डी-नगरस्य पञ्चशतवर्षाणां (५००) ऐतिहासिकी यात्रा" इति विषये एका शोधगोष्ठी विभागीयसभागारे आयोजिता। कार्यक्रमे विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थी मुख्यातिथिरूपेण उपस्थितः आसीत्, यदा च कार्यक्रमस्य अध्यक्षता प्रख्यातः साहित्यकारः इतिहासकारः च डॉ. गङ्गाराम राजी अकरोत्। कार्यक्रमस्य संयोजकः इतिहासविभाध्यक्षः च डॉ. राकेशकुमारशर्मा उपस्थितवतां विदुषां स्वागतं कुर्वन् सूचितवान् यत् विश्वविद्यालयस्य एकस्याः विशेष-शोधपरियोजनायाः अन्तर्गतं मण्डीनगरस्य पञ्चशतवर्षाणां इतिहासम् अधिकृत्य एकस्य व्यापक- पुस्तकस्य लेखन-कार्यं प्रचलति।आचार्यः ललितकुमार अवस्थी मुख्यातिथिभाषणे अवदत् यत् मण्डीनगरस्य इतिहासः केवलं क्षेत्रीयइतिहासः नास्ति, अपि तु हिमालयी- सभ्यतायाः संस्कृतेः च एका महती धरोहरः वर्तते। सः अकथयत् यत् इतिहासस्य प्रामाणिक- प्रलेखनेन आमामिपीढीनाम् अतीतं बोद्धुम् अवकाशः मिलिष्यति। सः विद्वद्भ्यः आग्रहं कृतवान् यत् ते शोध- आधारित- तथ्यपरक- लेखनस्य माध्यमेन मण्डी-नगरस्य ऐतिहासिक- विरासतं राष्ट्रियस्तरे ख्यातिं प्रापयितुं स्व-योगदानं दद्युः। सः विश्वविद्यालयेन सञ्चालिताम् एतां परियोजनां महत्त्वपूर्णाम् अकादमिकीं प्राथमिकतां स्वीकुर्वन् अस्य सफ़ल-कार्यान्वयनार्थम् इतिहास- विभागं वर्धापितवान्।कार्यक्रमस्य अध्यक्षतां कुर्वन् डॉ. गङ्गाराम राजी अवदत् यत् कस्यापि समाजस्य पहिचानं तस्य इतिहासेन सांस्कृतिक-स्मृतिभिः च निर्मितं भवति। मण्डी-नगरस्य इतिहासः विविध-आयामैः समृद्धः अस्ति, यस्य सुव्यवस्थित-सङ्कलनस्य प्रकाशनस्य च आवश्यकता बहुकालात् अनुभूयमाना आसीत्। एषा मञ्जूषा न केवलं शोधार्थिनां छात्राणां च कृते उपकारिका सिद्धा भविष्यति, अपि तु मण्डी-नगरस्य ऐतिहासिक-विरासतम् अवगन्तुम् एकः महत्त्वपूर्णः सन्दर्भग्रन्थरूपेण स्थापयिष्यते। अस्मिन् अवसरे डॉ. राकेशकुमारशर्मा परियोजनायाः विस्तृतां सूचनां ददन् अवदत् यत् पुस्तके मण्डी- रियासतस्य राजनैतिक- इतिहासः, धार्मिक- परम्पराः, पुरातात्त्विक-धरोहराः, लोकसंस्कृतिः, कलास्थापत्यं च, स्वतन्त्रता- आन्दोलने योगदानं, आधुनिक-विकासयात्रा इत्यादयः विविधाः विषयाः समाहिताः क्रियन्ते। सः उक्तवान् यत् विश्वविद्यालयस्य ध्येयं मण्डी-नगरस्य ऐतिहासिक- यात्रां शोधपरक-प्रामाणिकरूपेण सङ्गृह्य एकं स्थायी- अकादमिक- दस्तावेजं सज्जीकर्तुम् अस्ति। अनेनैव उद्देश्येन लेखन-कार्येण सम्बद्धानां विदुषाम् एषा गोष्ठी आयोजिता अस्ति, येन पुस्तकस्य रूपरेखा, विषयवस्तु, शोधदिशा च इति विषयेषु विचार-विमर्शः भवितुं शक्नुयात्।गोष्ठ्याम् उपस्थितेषु विद्वत्सु डॉ. कमल प्यासा, डॉ. राकेश कपूरः, डॉ. नरेश वैद्यः, विनोद बहलः, अनिल शर्मा, प्रकाशः, मुरारी शर्मा, भगतराम गुलेरिया, सुनीता कपूरः, अंशुल मल्होत्रा, समसेर मिन्हासः, राजेन्द्र कुमारः, विद्याशर्मा च स्व-स्व- विषय- सम्बन्धितानां शोधपत्राणां लेखनकार्यस्य च प्रगतिं प्रस्तौतवन्तः, पुस्तकस्य स्वरूपं सामग्रीं च अधिकं समृद्धं विधातुं प्रमुखाणि सूझनानि दत्तवन्तः। कार्यक्रमे सहायक-आचार्यः डॉ. रामपालः, राजेश शर्मा, शोधार्थी वेद प्रकाशः, डोल्मा, सुरेखा, राजू, सूर्यप्रकाशः, अन्ये छात्राः शोधार्थिनश्च उपस्थिताः आसन्। कार्यक्रमस्य समापनं धन्यवाद-ज्ञापनेन अभवत्।



## विशेष-आकर्षणरूपेण अभवत् 'नारी का दिल' इति कथा-सङ्ग्रहस्य विमोचनम्

अस्मिन् अवसरे दिवङ्गतस्य विख्यात-इतिहासविदः शिक्षाविदः च डॉ. एम. एस. अहलूवालिया- महोदयस्य रचितस्य 'नारी का दिल' इति कथा- सङ्ग्रहस्य अपि विमोचनं कृतम्। अस्याः कृतेः सम्पादनं तस्य शिष्येण इतिहास-विभाध्यक्षेण डॉ. राकेशकुमारशर्मणा स्वगुरुं प्रति श्रद्धाञ्जलिस्वरूपेण विहितम्। पुस्तकस्य विमोचनं मुख्य-अतिथिना कुलपतिना आचार्येण ललितकुमार अवस्थी- महोदयेन, अध्यक्षेण डॉ. गङ्गाराम राजीमहोदयेन, उपस्थितैः विद्वद्भिश्च संयुक्तरूपेण विहितम्। स्ववक्तव्ये डॉ. राकेशकुमार शर्मा अवदत् यत् डॉ. एम. एस. अहलूवालिया, प्रतिष्ठितः इतिहासकारः, साहित्यकारः, शिक्षकः, संवेदनशील-चिन्तकश्च आसीत्। तस्य साहित्ये समाजस्य, मानवीयमूल्यानां, नारीजीवनस्य च विविध-अनुभूतीनां सजीवं चित्रणं प्राप्यते। सः अकथयत् यत् एषा सम्पादिता कृतिः तं प्रति श्रद्धा-गौरवयोः एकः नम्रः प्रयासः अस्ति, येन नूतन-पीढी तस्य साहित्यिक-योगदानेन परिचिता भवितुं शक्ष्यति।मुख्यातिथिः आचार्यः ललितकुमार अवस्थी डॉ. अहलूवालिया-महोदयस्य साहित्यिकम् अवदानं स्मरन् अवदत् यत् एतादृशाः रचनाकाराः समाजस्य सांस्कृतिकचेतनां वर्धयन्ति। तत्रैव अध्यक्षः डॉ. गङ्गाराम राजी पुस्तकं डॉ. अहलूवालिया- महोदयस्य रचनात्मकदृष्टेः महत्त्वपूर्णं प्रलेखं मन्वानः अस्य प्रकाशनं साहित्य- जगतः कृते एका श्लाघनीया उपलब्धिः इति प्रतिपादितवान्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
जपानदेशे कियोमास-नामकस्य भीमवानरस्य चित्राणि सर्वैः दृष्टानि। सः गभीरं चिन्तयति इति जनैः विचारितम्।

**काव्या-** नमस्ते नन्दिनि। भीमवानरस्य गभीरा चिन्ता तु अतीव आमोदकरी अस्ति। सः किं चिन्तयति इति कः जानाति। परन्तु मया अन्या काचित् आमोदकरी वार्ता पठिता। एकस्मिन् समाचारपत्रे प्रकाशितः रक्तबिन्दुः पाठकैः दृष्टः। तेन पाठकाः व्याकुलाः जाताः। पश्चात् तत् ऋतुस्राव-विषये जन-जागरूकता-अभियानम् इति ज्ञातम्।

**नन्दिनी-** सत्यम्, सा वार्ता मया अपि पठिता। समाचारपत्रे रक्तबिन्दुं दृष्ट्वा जनाः भीताः जाताः इति मया चिन्तितम्। परन्तु तस्य अभियानस्य लक्ष्यं प्रशंसनीयं वर्तते। अधुना अन्या एका विस्मयकारिणी वार्ता श्रुता। अमेरिका-देशे कयाचित् महिलया मार्गदर्शकयन्त्रस्य निर्देशः अनुसृतः। तया स्थूलयानम् ऋजुतया लौहपथे चालितम्।

**काव्या-** अहो! यन्त्राणाम् अन्धानुकरणं कदापि हितकरं न भवति। सा महिला सुरक्षिता जाता इति तस्याः महत् भाग्यम्। परन्तु अधुना एका चिन्ताजनिका वार्ता अपि प्राप्ता। ओमान-देशस्य समीपे पलाऊ-ध्वजायुक्ता तैलवाहिनी नौका अमेरिका-सेनया आक्रान्ता। तस्यां नौकायाम् भारतीय-नाविकाः कार्यं कृतवन्तः सन्ति। एकविंशतिः नाविकाः रक्षिताः, परन्तु त्रयः नाविकाः अद्यापि लुप्ताः सन्ति। भारतदेशेन अमेरिका-देशस्य राजदूताय प्रतिवाद-पत्रं दत्तम्।

**नन्दिनी-** एषा वार्ता अतीव दुःखदा अस्ति। सागरमार्गे नाविकानां सुरक्षा अतीव आवश्यकी वर्तते। सर्वैः राष्ट्रैः शान्तिः रक्षणीया। अद्यतनः कार्यक्रमः अत्रैव समाप्तः जातः। पुनर्मेलिष्यामः। नमो नमः।

## लौकिकन्यायकोशः

### अण्डकुक्कुटीन्यायः

अण्डं प्रथमं जातं वा कुक्कुटी प्रथमं जाता वा इति अद्य यावत् ननिश्चितम्। अण्डं विना कुक्कुट्याः निर्माणं न भवति। तथैव अङ्कुरः आदौ जातः वा तस्य बीजम् आदौ जातं वा? इत्यत्र अपि "पूर्व- अपर" सम्बन्धः नास्ति परस्परकार्यकारणसम्बन्धः अस्ति। अयं बीज-अङ्कुरप्रवाहः अनादिः अनन्तः वर्तते।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# कृषिमन्त्रिणः घोषणा: बिहारराज्ये उर्वरकस्य नास्ति कापि न्यूनता; अवैधविक्रेतॄणां खले कंठापातः

- **कृषिसंरक्षणाय मन्त्रालयस्य 'शून्य सहिष्णुता' नीतिः; २१३ प्रतिष्ठानानां अनुज्ञप्तयः तत्कालप्रभावेण निरस्ताः**
- **आन्तरराष्ट्रिय-सीमासु 'सशस्त्र सीमा बल' (SSB) इत्यनेन सह कृषिविभागस्य महत्सीमासुरक्षा**

**हिमसंस्कृतवार्ता, डॉ. राघव नाथ झा।** बिहारस्य कृषिक्षेत्रे उर्वरकस्य (खादस्य) उपलब्धतां सुनिश्चितां कर्तुं राज्यसर्वकारः पूर्णतया कटिबद्धः दृश्यते। राज्यस्य माननीयाः कृषिमात्राः श्रीविजयकुमारसिन्हा महोदयाः अद्य कृषकान् सम्बोध्य दृढशब्देषु आश्वस्तं कृतवन्तः यत् वर्तमानसमये राज्यस्य कस्मिन्नपि जनपदे उर्वरकस्य किमपि वैकल्यं वा न्यूनता नास्ति। सर्वकारस्य सञ्चयागारेषु (Stock) पर्याप्तमात्रायां रासायनिक-उर्वरकाणि सुरक्षितानि सन्ति। मन्त्रिणा स्पष्टं कृतं यत् कृषकाः केवलं स्वकीयावश्यकतानुसारमेव सन्तुलितमात्रायां यूरिया-डीएपी-इत्यादीनां उपयोगं कुर्युः, एतदर्थं सर्वकारेण प्रचार-प्रसारमाध्यमैः जागृति-अभियानमपि सञ्चालितं वर्तते।

## उर्वरक-सञ्चयस्य तात्कालिकी स्थितिः (मीट्रिक-टन् मध्ये):

कृषिविभागेन जारीकृतानुसारं राज्ये सम्प्रति उर्वरकाणां स्थितिः सुदृढा अस्ति, या निम्नरूपेण अस्ति- यूरिया (Urea): २.३५ लक्षमितम्
डी.ए.पी. (DAP): ४.५६ लक्षमितम्
एन.पी.के. (NPK): ८.८२ लक्षमितम्
एम.ओ.पी. (MOP): १.७१ लक्षमितम्
एस.एस.पी. (SSP): १.१७ लक्षमितम्
कृष्णविपणनकर्तॄणां विरुद्धं 'महाअभियानम्' कृषिमंत्री श्रीसिन्हा महोदयः अवदत् यत् खादस्य कालाबाजारी (कृष्णविपणनं), अवैध-सञ्चयम् तथा च निर्धारितमूल्यात् अधिकधनग्रहणं सर्वथा अक्षम्यम् अस्ति। विभागः 'शून्य-सहनशीलता' (Zero Tolerance) इति नीत्या कार्यं करोति। एतदर्थं मुख्यालयस्तरे गठितः विशेषः 'उड़नदस्ता-दलः' (Flying Squad) तथा च जनपद-कृषि-अधिकारिणाम् अन्वेषणसमितयः निरन्तरं औचक-निरीक्षणं कुर्वन्त्यः सन्ति।१० जून २०२६ पर्यन्तं कृता तीक्ष्णा कार्यवाही:

**१. प्राथमिकी (FIR):** नियमाङ्गनं प्राप्य आहत्य ४३ उर्वरकप्रतिष्ठानानां विरुद्धं प्राथमिकी (FIR) पञ्जीकृता।

**२. लाइसेंस-निरसनम्:** आहत्य २१३ उर्वरकप्रतिष्ठानानां व्यापार-अनुज्ञप्तयः तत्कालप्रभावेण निरस्ताः कृताः।

मन्त्रिणा विक्रेतारः चेतिताः यत्— "विक्रेतॄणां 'पॉस्' (PoS) यन्त्रे प्रदर्शिता या मात्रा अस्ति, तथा च भौतिकरूपेण या मात्रा उपलब्धा अस्ति, तयोः कशेन सत्यापनं भविष्यति। वञ्चनां प्राप्य कारागारस्य मार्गः सुनिष्चितः।"

### सीमावर्ति-क्षेत्रेषु 'एस.एस.बी' (SSB) इत्यस्य दृष्टिः

नेपाल-आन्तरराष्ट्रिय-सीमाभिः संलग्नेषु बिहारस्य जनपदेषु उर्वरकस्य गुप्ततस्करीं रोद्धुं कृषिविभागः अत्यधिकं सतर्कः अस्ति। एतेषु क्षेत्रेषु 'सशस्त्र सीमा बल' (SSB) इत्यनेन सह उत्तमं समन्वयं स्थापयित्वा निरीक्षणदलेन निरन्तरं धाटी (छापेमारी) क्रियते। अस्यैव परिणामः अस्ति यत् केवलं सीमावर्ति-जनपदेषु एव १९ प्रतिष्ठानोषु प्राथमिकी प्रविष्टा तथा च १२३ प्रतिष्ठानानां अनुज्ञप्तयः निरस्ताः।

अन्ते मन्त्रिणा अधिकारिणः निर्दिष्टाः यत् प्रखण्डस्तरे (Block Level) वास्तविक-आवश्यकतां दृष्ट्वैव उर्वरकस्य उप-आबंटनं करणीयम्। कृषकाः अपि जागरूकः भवेयुः, यदि कुत्रापि कालाबाजारी दृश्यते, तर्हि झटिति विभागं सूचयेयुः।

# वैदिक-मर्यादया राष्ट्रसेवायाः संकल्पः, राजेश झा 'राजू' महोदयेन गृहीतः भाजपा-महामन्त्रि-पदभारः



**हिमसंस्कृतवार्ता, डॉ. राघव नाथ झा।** बिहार-प्रदेशस्य नवनियुक्तः महामन्त्री राजेश झा 'राजू' महोदयः बुधवासरे प्रदेश-कार्यालये विधिवत् रूपेण स्वकीय पदभारं गृहीतवान्। अस्मिन् पावन-अवसरे सम्पूर्णं वातावरणं वैदिक-मन्त्रोच्चारेण, पूजनेन, हवन-प्रक्रियया च देदीप्यमानं पवित्रं च जातम्। एतादृशे आध्यात्मिक-वातावरणे सः स्वकक्षं प्रविश्य कार्यभारं सम्भाशितवान्।अस्मिन् गरिमामये कार्यक्रमे प्रदेशस्य वरिष्ठाः पदाधिकारिणः, शीर्षनेतारः, तथा च विशालायां संख्यायां कर्मठ-कार्यकर्तारः उपस्थिताः आसन्। सर्वैः मिलित्वा नवनियुक्ताय महामन्त्रणे नूतन-दायित्वस्य कृते वर्धापनानि तथा च शुभाशंसाः प्रकटिताः। संगठनस्य सुदृढीकरणाय संकल्पः, कार्यकर्तृभिः सह समन्वये विशेषबलम् पदभारं स्वीकृत्य राजेश झा 'राजू' महोदयः पत्रकाराणां पुरतः स्वविचारान् प्रकटयन् अवदत् यत्— "दलेन (पार्टी) यत् गुरुतरं दायित्वं मह्यं समर्पितं, तस्य निर्वहणम् अहं पूर्णया निष्ठया, प्रामाणिकतया, प्रतिबद्धतया च करिष्यामि। भाजपा एका कार्यकर्तृ-आधारिता संस्था वर्तते, अतः संगठनस्य सुदृढीकरणमेव मम सर्वोत्कृष्टा प्राथमिकता भविष्यति।" सः अग्रे विशेषरूपेण अवदत् यत् सम्पूर्णे प्रदेशे संगठनात्मक-गतिविधीनां प्रभावशालि-सञ्चालनाय व्यापकः संवादः, कार्यकर्तृभिः सह च उचितः समन्वयः स्थापयिष्यते। सम्प्रति बिहार-प्रदेशे भाजपा-संगठनं निरन्तरं शक्तिशालि भवद्रूपेण प्रगच्छति, कार्यकर्त्याणां कठिनेन परिश्रमेणैव दलं नूतन-कीर्तिमानानि प्राप्नोति। कार्यक्रमस्य अन्ते समुपस्थितैः सर्वैः वक्तृभिः कार्यकर्तृभिः च तस्य यशस्वी-कार्यकालस्य कृते मङ्गलकामनाः कृताः।

# विष्णुसहस्रनामपाठेन चरकसंहितोक्तमन्त्रैश्च धन्वन्तरिभगवते १०८ तुलसीपत्रार्पणम्



हिमसंस्कृतवार्ता, गोधरा, ११ जून। अधिकमासस्य पवित्रैकादश्याः शुभावसरे जयजलाराम आयुर्वेदिक मेडिकल कॉलेज, शिवपुरी-गोधरा इत्यत्र संस्कृतक्लबस्य तथा संहितासिद्धान्त-संस्कृतविभागस्य संयुक्तोपक्रमेण संस्कृतभारत्याः पञ्चमहाल-शाखायाः सहयोगेन भगवान् श्रीधन्वन्तरये समर्पितस्य १०८ तुलसीपत्रार्पणकार्यक्रमस्य भक्तिपूर्वकम् आयोजनम् अभवत्। कार्यक्रमस्य प्रारम्भः मङ्गलाचरणेन अभवत्। ततः विष्णुसहस्रनामपाठेन भगवानः श्रीधन्वन्तरेः अभिषेकः पूजनञ्च सम्पन्नम्। अनन्तरं चरकसंहितोक्तमन्त्राणां मङ्गलमयेन उच्चारणेन सह १०८ तुलसीपत्राणां समर्पणम् अकारि। अस्मिन् कार्यक्रमे आयुर्वेदस्य अधिदेवतायाः भगवानः धन्वन्तरेः प्रति श्रद्धाभक्त्योः प्रकटनम् अभवत्।विष्णुसहस्रनाम्नः मधुरपाठेन वैदिकमन्त्राणां च उच्चारणेन सम्पूर्णं वातावरणम् आध्यात्मिकभावेन भक्तिरसेन च परिपूर्णम् अभवत्। उपस्थितैः सर्वैः भगवानः धन्वन्तरेः चरणयोः आरोग्यं दीर्घायुष्यं सुखसमृद्धिं लोककल्याणञ्च प्रार्थितम्।अस्मिन् अवसरे महाविद्यालयस्य अध्यापकवृन्दैः, कर्मचारीभिः तथा बहुसंख्यकैः छात्रैः उत्साहपूर्वकं सहभागिता कृता। कार्यक्रमे सर्वेषां सहभागिनां सक्रियः सहयोगः उल्लेखनीयः आसीत्। कार्यक्रमस्य सफलायोजनार्थं संस्कृतक्लबस्य, संहितासिद्धान्त-संस्कृतविभागस्य तथा संस्कृतभारत्याः पञ्चमहाल-शाखायाः कार्यकर्तॄणां प्रयत्नाः सर्वैः प्रशंसिताः।

# संस्कृतभाषायाः सशक्तिकरणेन भारतं पुनः विश्वगुरुः भवितुमर्हति- महामन्त्री सत्यनारायणभट्टः




**हिमसंस्कृतवार्ताः- गौरव दुबे, हजारीबाग।** रामगढस्थ- जाराटोलाक्षेत्रस्य राधागोविन्द- सार्वजनिक- उच्चविद्यालये आयोजितस्य सप्तदिनात्मक- संस्कृतावासीय- प्रबोधनवर्गस्य समापनं मङ्गलवासरे सञ्जातम्। अस्मिन्वर्गे झारखण्डप्रान्तस्य विभिन्नमण्डलेभ्यः समागताः पञ्चाशदधिकशतसङ्ख्यकाः छात्रच्छात्राः प्रतिभागमकुर्वन्। प्रशिक्षणसमये प्रतिभागिभिः संस्कृतसम्भाषणस्य संस्कृतगीतानां दैनिकव्यवहारे संस्कृतप्रयोगस्य च अभ्यासः अकारि। मुख्यातिथिः सिंहसिद्धनाथः समापनसमारोहस्य उद्घाटनमकरोत्। अस्मिन्कार्यक्रमे कल्याणपुरीवास्तव्यः सत्यनारायणभट्टः मुख्यवक्तृरूपेण उपस्थितः आसीत्। भारतस्यात्मा संस्कृते निवसतीति स अवदत्। संस्कृतस्य जनभाषारूपेण निर्माणेन तस्य व्यापकप्रचारप्रसाराभ्यां च भारतं पुनः विश्वगुरुपदं प्राप्तुं शक्नोतीति तेन न्यरूप्यत। संस्कृतभारती-झारखण्डप्रान्ताध्यक्षः डॉ. ताराकान्तशुक्लः कार्यक्रमस्याध्यक्षतामवहत्। अस्मिन्नवसरे प्रान्तोपाध्यक्षः डॉ. दीपचन्द्ररामकश्यपः मङ्गलमतिलकराजः पाठकज्ञानब्रह्मः प्रसादशत्रुघ्नः ओमप्रकाशगुप्तश्च उपस्थिताः आसन्। प्रशिक्षणकार्ये प्रान्तमन्त्री पृथ्वीराजसिंहः शिक्षणप्रमुखः विनयकुमारपाण्डेयः प्रान्तविद्यालयप्रमुखः सुनीलकुमारकश्यपः, नवीनकुमारः जगदम्बाप्रसादः, अंशुमानपाण्डेयः, आशुतोषपाण्डेयश्च महत्त्वपूर्णं योगदानमयच्छन्। कश्यपः सुनीलकुमारः कार्यक्रमस्य सञ्चालनमकरोत्।